योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०९९

एकोनशततमः सर्गः ९९

शिखिध्वज उवाच ।

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्महामुने ।

स्थितोऽस्मि गतसंदेहो विश्रान्तमतिरात्मवान् ।। १

ज्ञातज्ञेयो महामौनी तीर्णमायामहार्णवः ।

शान्तोऽहमनहंरूपो ज्ञः स्थितोऽस्मि निरामयः ।। २

अहो नु सुचिरं कालं प्रभ्रान्तोऽहं भवाम्बुधौ ।

स्थानमक्षयमक्षुब्धमधुना प्राप्तवानहम् ।। ३

एवं स्थिते मुने नास्ति साहंतादिजगत्त्रयम् ।

मूर्खबुद्धमिदं भाति यत्तद्ब्रह्मेति वेद्म्यहम् ।।

कुम्भ उवाच ।

जगदेव न यत्रास्ते तत्राहंत्वंविभासनम् ।

इत्थमम्बरसंसारः क्व कुतः कीदृशः कथम् ।। ५

यथास्थितव्यवहृतिर्मौनी शान्तमना मुनिः ।

सौम्यार्णवोदरावर्तपरिस्पन्दवदास्व भो ।। ६

ब्रह्मरूपमिदं शान्तमित्थमस्ति यथास्थितम् ।

अहं जगदिदं चेति शब्दार्थात्म नभोमयम् ।। ७

इदमाद्यन्तरहितं सर्वं संसारनामकम् ।

चिच्चमत्कृतिनामात्म नभः कचकचायते ।। ८

संनिवेशदृशः शान्तौ तदस्ति कनकं यथा ।

जगदाद्यर्थसंशान्तौ ब्रह्मेदं विद्यते तथा ।। ९

यथा स्वयंभूः संकल्पः स्वयं नाम तथैव हि ।

एतौ स्ववेदनायत्तौ बन्धमोक्षौ व्यवस्थितौ ।। १०

अहमित्येव संकल्पो बन्धायातिविनाशिने ।

नाहमित्येव संकल्पो मोक्षाय विमलात्मने ।। ११

यद्बन्धमोक्षसंकल्पशब्दार्थानां सदा सताम् ।

स्वरूपवेदनं तत्सत्केवलत्वं च कथ्यते ।। १२

अनहंवेदनं सिद्धिरहंवेदनमापदः ।

सोऽहमेवानहमिति शुद्धबोधो भवात्मवान् ।। १३

असंकल्पनमात्रेण सम्यग्ज्ञानोदयात्मना ।

संकल्पः क्षीयते सिद्धौ स्वयमेवासदात्मकः ।। १४

अप्रतर्क्ये स्वरूपे हि नास्ति कारणता शिवे ।

कारणाभावतः कार्यपदार्थोऽपि न विद्यते ।। १५

पदार्थाभावसंसिद्धौ वेदनं नोपपद्यते ।

कारणाभावतो नित्यमहंभावस्य नोदयः ।। १६

अहंभावानुदयतः संसारः कस्य कीदृशः ।

संसाराभावतः सर्वं परमेवावशिष्यते ।। १७

यदिदं भासते तत्सत्परमेवात्मनि स्थितम् ।

परं परे परापूर्णं सममेव विजृम्भते ।। १८

तेन निस्तिमितं सर्वं शिलाकीर्णमिवाचलम् ।

विद्धि रश्मिमयाकारमिव ब्रह्म जगत्स्थितम् ।। १९

पुरः संकल्पके नष्टे संकल्पनगरस्य यत् ।

रूपं तद्विद्धि जगतः खादच्छं सदसन्मयम् ।। २०

छायापुरुषवत्स्पन्दि शान्तं निर्मननं जगत् ।

जगच्छब्दार्थरहितं यः पश्यति स पश्यति ।। २१

रूपालोकमनस्कारा नीरसागमभावना ।

सम्यग्ज्ञानावबोधस्य निर्वाणं वै विदुर्बुधाः ।। २२

यथास्ति वातो निःस्पन्दो यथास्ति खगतोपि वा ।

यथा हेमासंनिवेशमस्ति ब्रह्म जगत्तथा ।। २३

नीरसा असदाभासा जगत्प्रत्ययकारिणः ।

रूपालोकमनस्काराः सन्तीमे ब्रह्मरूपिणः ।। २४

ऊर्मिशब्दार्थरहितं यादृगम्बु बहून्यपि ।

सर्गशब्दार्थरहितं तादृग्ब्रह्म निसर्गवत् ।। २५

सर्ग एव परं ब्रह्म परं ब्रह्मैव सर्गदृक् ।

सर्गशब्दार्थरहितो वाक्यार्थस्त्वेष शाश्वतः ।। २६

ब्रह्मशब्दार्थसंपत्तौ सर्गशब्दार्थधीः कृता ।

सर्गशब्दार्थसंसिद्धौ ब्रह्मशब्दार्थधीः कृता ।। २७

समस्तशब्दशब्दार्थभावनाभावनोदयम् ।

शुद्धं तिष्ठति चिद्व्योम ब्रह्मशब्देन कथ्यते ।। २८

सम्यग्दर्शनसंसिद्धावुभयोरप्यवेदने ।

यच्छिष्टमजरं शान्तं ततो वाग्विनिवर्तते ।। २९

संशान्तसर्वात्मकवेदनौघ-

मस्तीदमेकात्मकस्वस्वरूपम् ।

यथास्थितं सर्वजगत्स्वरूपं

पाषाणरूपं च परं ज्ञरूपम् ।। ३०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० चू० शिखिध्वजावबोधनं नामैकोनशततमः सर्गः ।। ९९।।